Shri Raghunath Temple MSS. Library,
JAMMU

No. ४२१६

Title सोम विहारी कारिका विवरणं

Author ×

Extent १६ Age ×

Subject मीमांसा शास्त्रं

© Dharmartha Trust J&K. Digitized by eGangotri

सोमविस्ताटिकाटिकाविवरणम्

५२८६

© Dharmartha Trust J&K. Digitized by eGangotri

सोमविहारकारिका
पि[illegible]

सोमविहारकारिका

© Dharmartha Trust J&K. Digitized by eGangotri

श्रीगुरुचरणकमलेभ्योनमः॥ ॥अथ कर्मकांडकलापे अतीव निरूढा ततः कश्चिद्दृष्टिकल्पः पुरुषः सर्वेषां सम
तंत्राणां प्रकृतिभूतज्योतिष्टोमसंबंधिविहारस्य प्रतिपादकानां मंडनकारिकाणां गूढार्थत्वात्सुखबोधलब्धये
व्याख्यानमारभते॥ तत्र तावत्सदोहविर्धानादिभ्यः पुरस्तात्प्राग्वंशनिर्माणं प्रथमतः प्रतिपाद्यते। यद्यपि स्व
कीयसूत्रकृत्सूत्रे प्राग्वंशविधायकं सूत्रं न दृश्यते तथापि जरत्सूत्रे तद्विधायकसूत्रस्य विद्यमानत्वात्तदनुसा

श्रीगणेशाय नमः॥ प्राग्वंशः षोडशायामो द्वादशव्यास इष्यते॥ प्राग्वंशस्य पश्चिमे भागे प
त्नीशाला चतुष्पदा॥ १॥

रेणानुस्वकीयसूत्रकृत्सूत्रानुरोधेनाकृतः तस्मिन्विषये स्वसूत्रस्यानुपलभ्यमानत्वात्। अत एव तत्सूत्रानुक
रणं प्राग्वंशः षोडशायाम इति॥ तथा च तत्सूत्रे षोडशप्रक्रमायामो द्वादशव्यासः तस्य मध्ये दार्शिको विहार इ
ति पश्चात्पत्नीशालामिति च। स्वमते तु आयामविशेषस्यानुक्तत्वाद्यदर्थलक्षणौ आयामव्यासौ प्राग्वंशस्येति।

© Dharmartha Trust J&K. Digitized by eGangotri

ननुस्वसत्रे प्राग्वंशविधायकं सत्त्वं मात्रैः प्रतिदृश्यतु। पत्नीशालाविधायकं सत्रंतु प्रतिदृश्यते एवेत्याशंक्याह। प्रा
ग्वंशादिति॥ पत्नीशाला च तु ष्पदे स्येतरदनुशासनेपि ज्ञातस्त्र स्यैवेति बोध्यं॥ ॥इदानीं महावेदिनिर्माणार्थ
न्तस्साधनभूतस्य दंडविशेषस्य प्रमाणमाह॥ वेदेरिति॥ द्विर्द्वादशांगुलेः प्रक्रमैः सौमिक्याः वेदेः विमानं कर्त
व्यमिति शेषः॥ द्विर्द्वादशांगुलैः प्रक्रमैरित्यनेन वाक्येन मानदंडस्यारत्निमात्रत्वं अभिप्रेतं। अरत्निप्रमाणो

वेदेर्विमानं सौमिक्याः क्रमैर्द्विर्द्वादशांगुलैः॥ आदित्रिसप्तसु द्वित्रिचं इद्वियुगभ्रूमिषु॥२॥
भूत्रिभूद्विशरैकेषु शंकवो दशपंच च॥ षड्विंला रत्निषष्ठो नाम्ना षट्त्रिंशदरत्निका॥ ३॥

शा नमहावेदिनिर्माणस्योपदेशिकत्वात् इदानीं तेनैव दंडेन पंचदशशंकूनां आरोपणप्रमाणमाह॥ ॥आदि
रिति॥ आदिशंकुस्थानं तु मध्यमाज्ञ्जालादिकात् त्रिषप्रक्रमे षतीतेषु ज्ञेयं॥ उत्तरशंकूनां आरोपणं तु पाठ
क्रमानुसारेणैव ज्ञातव्यं॥ ॥अथ विमानरज्जोः प्रमाणविशेषमाह॥ षड्विंलेति॥ षड्विंलास्य अरत्निषष्ठ

© Dharmartha Trust J&K. Digitized by eGangotri

स्वषड्विलारत्निषष्टेताभ्यां कृताअष्टात्रिंशदरत्निकाविमानरज्जुःकर्तव्येतिशेषः॥ तस्याःसप्तदशसुअरत्नि
षुअतीतेषुसत्सुआकर्षणार्थंचिन्हंस्यादितियावत्॥ किंचातस्याःरज्जोःउभयपार्श्वेविहारनिर्माणरूपवैशिष्ट्य
कार्यार्थंपाशौकार्यौ। तौविनासेत्रनिर्माणकार्यस्यानिष्पत्तेः। तयोःपाशयोःद्वादशप्रक्रमाःस्मृताः। अस्यार्थः।

विमानरज्जुचिह्नंस्यात्तस्याःसप्तदशस्वथ॥ पाशौकार्यौतयोर्मध्येप्रक्रमाद्द्वादश
स्मृताः॥ ४॥ षट्त्रिंशिकावारज्जुचिंन्हेस्याद्विमानेच्यष्टलक्षणम्॥ श्रोणीपंचदशस्वाथे

यथाकिंचीह्नाअष्टात्रिंशदरत्निकाविमानरज्जुर्विमितातेनैवप्रकारेणद्वादशारत्निमात्रिकाचतुर्नांशरहिताउ
भयपाशविशिष्टाद्वितीयारज्जुर्विमातव्येत्यर्थः॥ ॥ एवोक्तविमानरज्जोःवैकल्पिकंप्रमाणान्तरमाह॥ षट्त्रिंशि
कावेति॥ अथमहावेदिनिर्माणप्रकारमाह॥ श्रोणीति॥ आदिशंकौविमानरज्जुंद्वादशिकांचनिधायउत्तरपा
र्श्वेचतुर्थशंकौनिधायसहायभूतेनद्वितीयेनचिन्हमाकर्षयित्वामध्यमशंकुमारभ्यदक्षिणपार्श्वेअरत्निना

© Dharmartha Trust J&K. Digitized by eGangotri

पंचदशकृत्वः मानं सं विधाय तत्र शंकुमारोपयेत्। एवमुत्तरपार्श्वेपि मंतव्यां शंक्वारोपणां चाद्यमो शंकुमध्योरेदक्षि
णियोस्तकौ॥ मध्येमंडपस्यमानमाह॥ मध्येनंतरतुर्ययोरिति॥ द्वितीयचतुर्थशंक्वोः रज्जुद्वयं निधायपूर्ववत्चिन्हा
कर्षणां कृत्वा मध्ये मानं कुर्यात्। अनंतरतुर्ययोरित्यनेनवाक्येन मध्यतः नवारत्निविस्तृतत्वं प्रतिबोधितं पूर्वापर
भागेनादक्षिणोत्तरपार्श्वेपि विमानावधिमाह॥ दशस्वष्टसुतत्कोणाइति॥ मध्यशंकोरितिसर्वत्रानुवर्तते। दक्षि

मध्येनंतरतुर्ययोः॥ ४॥ दशस्वष्टसुतत्कोणाः तृतीयेरत्निमात्रकाः॥

णापार्श्वेदशसुप्रक्रमेष्वतीतेषु मध्यस्तुशंकुरोपणां उत्तरपार्श्वेअष्टसुप्रक्रमेष्विति॥ तृतीयेशंकोर्होतुर्धि ष्ण्य
स्यस्थानमाह॥ तृतीयेरत्निमात्रकाइति॥ अरत्निप्रमाणाः अरत्निमात्रकाः प्रमाणोद्द्वयसज्जिरित्यादिनामात्र
च्प्रत्ययोवोद्धव्यः। यद्यपितृतीयेशंकौहोतुर्धिष्ण्यस्यैवसंभवः तथापिधिष्ण्याइतिबहुवचनस्यविवक्षात्

© Dharmartha Trust J&K. Digitized by eGangotri

तृतीयशंकुसमतया उत्तरपार्श्वयोर्निर्मीलव्यानां धिष्ण्यानां अभिप्रायेणोपपद्यते। अरत्निमात्रकाः धिष्ण्याः का
३ र्या इत्युक्तं। तत्र चतुरश्रकरणाय श्लोकौ यावत्प्रमाणा रज्जुरित्यादिविधिना चतुरश्रत्वं धिष्ण्यानां उपपद्यते। परिमंड
लपक्षे तु द्वादशांगुलप्रमाणामन्तयारज्ज्वा भ्रमणं परिलिखेत्। एवं कृते धिष्ण्यानां अरत्निपरिमितत्वं संभव

धिष्ण्याः प्रादेशान्तरालाः

ति॥ ननु धिष्णियानां परस्परं अंतरालप्रदेशः कियानित्याशंक्याह॥ प्रादेशान्तराला इति ननु प्रादेशान्तरालत्वं क
या युक्त्या साधनीयमित्याशंक्य तां युक्तिमेवानुवदति। कथमित्याशंक्य होतुर्धिष्ण्यशंकोः सकाशादुत्तरतः सा
र्धारत्नौ शंकुं निहन्यात् तदुत्तरतोप्येवमेव त्रिषु स्थानेषु शंकुं निहन्यात्। अनया युक्त्या शंकुरोपणे क्रियमाणे द्वाद
शांगुलेन भ्रमणे क्रियमाणेपि निरायासेनैव प्रादेशान्तरालत्वं संभवति। पूर्वोक्तप्रकारवद्दक्षिणतः शंकुमा ३

© Dharmartha Trust J&K. Digitized by eGangotri

रोप्यप्रशास्त्र धिष्ण्यस्यापि भ्रमणं कार्यमित्युक्तं भवति ~~ष्यथ~~ स्तेन पंक्तौ। आग्नीध्रमंडपप्रकारमाह॥ आ
ग्नीध्रं तु तुरीक इति॥ यस्मिन्शंकौ सदसः पूर्वमर्यादा समासात् तस्मात्शंकोः सकाशात् सदसः उत्तरभागे पादोनै
कादशात्नौ तथापादोन सप्तदशारत्नौ द्वौ शंकू निखातव्यौ तौ शंकू आग्नीध्रमंडपस्य पश्चिमावधिभूतौ॥
मार्जालीयाग्नीध्रधिष्ण्योः मानमाह॥ कार्यौ हीति॥ पंचमे शंकौ रज्जुद्वयं निधाय दक्षिणतः उत्तरतः आकृ

आग्नीध्रं तु तुरीयके॥ ६॥ रुद्रेषु सप्तदशसु शंकुपादोनतेष्विह॥
कार्यौ हि पंचमे कैषु स्मार्जालाग्नीध्रधि ष्ण्यौ॥ ७॥ सप्तमे प्राग्वदाग्नीध्रं

ष्य उभयत्र द्वादशसु अरत्निषु तीनेषु सत्सु दक्षिणपार्श्वे मार्जालीयधिष्ण्यस्य संधि शंकुं निहन्यात्। उत्त
रपार्श्वे आग्नीध्रीयधिष्ण्यस्य शंकुं निहन्यात्। आग्नीध्रं तु तुरीयक इत्यनेन वाक्येन आग्नीध्रीयमंडपस्य पश्चिमा
वधित्वं कथितं। अतः परं पूर्वावधिमित्वमाह॥ ॥सप्तमे प्राग्वदाग्नीध्रमिति॥ ॥सप्तमे शंकौ रज्जुद्वयं निधाय पा

© Dharmartha Trust J&K. Digitized by eGangotri

दोनैकादशसु पादेन सप्तदशसु अरत्निषु उत्तरपार्श्वे व्यतीतेषु सत्सु स्थलद्वये द्वौ शंकौ निखातव्यौ तौ शंकू आ
४ ग्नीध्रीयमंडपस्य पूर्वावधिभूतौ ज्ञातव्यौ॥ ॥तस्मिन्नेव शंकौ किंचिद्विशेषमाह॥ ॥धानं सार्धचतुष्टय इति
॥ ॥दक्षिणप्रदेशे चिन्हमाकर्षयित्वा सार्धचतुष्टयेष्वरत्निषु व्यतीतेषु सत्सु शंकुनिखननं कर्तव्यं। उत्तरप्रदे

धानं सार्धचतुष्टये॥ उत्करो दशमे शंकौ मनुषट्तरतः क्रमे॥८॥
ऊवध्यगोहखननस्थानमेकादशे पुनः॥

शेप्येवमेवात्र शंकुद्वयं हविर्धानमंडपस्य पश्चिमावधित्वेन ज्ञातव्यं॥ उत्करस्थानमाह॥ उत्कर इति॥ दशमे शंकौ
रज्जुद्वयं निधाय उत्तरप्रदेशे मनुषट्क्रमेषु चतुर्दशसु प्रक्रमेष्वतीतेषु सत्सु उत्करस्थानं बोध्यं॥ ॥प्रतिप्रस्था
तृकर्तृकं ऊवध्यगोहस्थानमाह॥ ऊवध्यगोहखननस्थानमिति॥ पुनः उत्करमानानंतरं एकादशे शंकौ ऊ ४
वध्यगोहखननस्थानं कर्तव्यं। ननु मूलवाक्ये ऊवध्यगोहस्थानस्य स्थलनियामकाभावात् दक्षिणपार्श्वे वा

© Dharmartha Trust J&K. Digitized by eGangotri

आहोस्विदुत्तरपार्श्वेस्याशंक्यस्खलनियामकत्वं उक्तास्थानातिदेशेन दर्शयति। एतदुक्तं भवति। यथा दशमे शं
कौ रज्जुद्वयं निधाय उत्तरप्रदेशे चतुर्दशसु प्रक्रमेषतीतेषु सत्सु उक्तास्थानं प्रतिपादितं। तथैवैकादशे शंकौ प्रक्रम
चतुष्टयेन संयुक्तेषु दशसु प्रक्रमेषु उत्तरपार्श्वे व्यतीतेषु सत्सु उबध्य गोह स्थानं कर्तव्यं॥ ॥अस्मिंन्नेव शंकौ किं
चिद्विशेषमाह॥ अस्मिंन्नेव शंकौ किंचिद्विशेषमाह॥ हविर्धानं प्राग्वदत्रेति॥ अस्यार्थः। एकादशे शंकौ प्राग्वत्स

हविर्धानं प्राग्वदत्र पाशयोर्व्यत्ययोधिकः॥ २॥

प्रमशंकुवत्सार्धचतुष्टयेषु प्रक्रमेषु उभयपार्श्वे व्यतीतेषु सत्सु हविर्धानस्य पूर्वावधिभूतौ शंकू निखातव्यौ॥ ह
विर्धानस्य पूर्वपार्श्वकरणे तत्र किंचिद्विशेषमाह॥ पाशयोर्व्यत्ययोधिक इति॥ पाशव्यत्यय एव हविर्धानपूर्वपा
र्श्वकरणे अतिरिक्तो व्यवसायः अन्युव्यवसाये स्यादेतत्तथादर्शनात्। अन्यत्सर्वं प्रमशंकुवत्तसातव्यं शामित्रं

© Dharmartha Trust J&K. Digitized by eGangotri

उपस्थानमाह॥षोडशस्विति॥द्वादशे शंकोरज्जुद्वयं निधाय उत्तरएवाकृष्य सार्धपंचदशारत्निषु उत्तरप्रदेशे व्य
५ तीतेषु सत्सु शामित्रापिस्थानमित्यर्थः॥ उत्तरत एव आकृष्येत्येतद्वचनं दक्षिणप्रदेशे आकर्षणनिरासार्थं कृतः
उपयोगाभावात्। दक्षिणप्रदेशे शामित्रदेशस्यासंभवाच्च॥ ॥उत्तरवेदिमानमाह॥ शंकोरिति उपांत्ययोः
5 षोडशस्वर्धहीनेषु शामित्रो द्वादशे भवेत्॥ शंकोरुत्तरवेदिस्यात्सार्धद्वय उपांत्य
योः॥ १०॥ अंतिमे द्वादशंस्वंसो चात्वालों साउदक्क्रमे॥

अंसस्य समीपे त्तः लो उपांत्योतयोः शंक्वोः त्रयोदश चतुर्दशशंक्वोरितियावत्। सार्धद्वये अरत्नौ उभयपार्श्वे
व्यतीते सति उत्तरवेदिस्वरूपं ज्ञातव्यमित्यर्थः॥ ॥महावेदेः अंसमानमाह॥ अंतिमे द्वादशस्वंसाविति अं
तिमे शंकोरज्जुद्वयं निधाय उभयपार्श्वे प्याकृष्य द्वादशसु अरत्निषु उभयपार्श्वे व्यतीतेषु सत्सु अंसज्ञानार्थं ५
शंकू निखातव्यौ॥ ॥चात्वालमानमाह। चात्वालों साउदक्क्रम इति॥ अस्यार्थः॥ अंसात्। उत्तरांसात् उदक्

© Dharmartha Trust J&K. Digitized by eGangotri

उत्तरप्रदेशे एकप्रक्रमे एकारत्नौ व्यतीते सति स चात्वालप्रदेशः॥ ननु इदानीं निर्मितः चात्वालः अन्य एव पाशु
बंधिकी वेद्यां निर्मितः चात्वालः अन्य एवेत्याशंक्य समाधत्ते॥ पशुबंधोक्तचात्वाल इति॥ पशुबंधे समंतात् षट्
त्रिंशदंगुलात्मकोयः चात्वालः स एव सोमयागविहारेपीत्यर्थः। ननु पशुबंधकर्मणि पशुबंधोक्तचात्वालः अ
स्तु सोमकर्मणि तु उत्तरवेद्यनुरोधेन हेतुना अन्य एव चात्वालः स्यात् इत्याशंक्याह॥ मतांतरमनुत्क्वैवेति॥ पशु

पशुबंधोक्तचात्वालः सोमेपीत्यवधार्यते॥ ११॥
मतांतरमनुत्क्वैव व्याख्यात इति कीर्तनात्॥

बंधकर्मणि षट्त्रिंशदंगुलदंडेन निर्मितः उत्तरवेदिसहगोयः चात्वालः स एव सोमयागेप्यस्तु कुतः। मानांतरस्यानु
क्तस्य चात्वालस्य सर्वसोममात्रकर्मणि सूत्रकारैरनुपदिष्टत्वात्। तस्य तेषां चात्वालानां यत्स्वरूपवैलक्षण्यं प्र
तिपादितं तत्र नास्तीति राद्धांतितं एवं च सति द्वादशाहद्वादशाहप्रभृतिषु सोमयागेषु शम्यामात्र एव चत्वालो

© Dharmartha Trust J&K. Digitized by eGangotri

नतुपर्वोक्तात्मानांतरविशिष्टश्चात्वालइत्यर्थः॥ ॥उक्तार्थेनतुपाशुवंधिकस्यचात्वालस्यसमस्यचितोश्रुता
६ येचात्वालाः तेषांस्वरूपतोकिंवैलक्षण्यं इत्याशंक्यवैलक्षण्यंस्वरूपतोस्त्येकवपुनः कथमंनेवौधायनाशयेनाह
॥शम्यामात्रस्तुसर्वत्रेति॥ अश्वमेधादियागेष्वित्यर्थः॥ शम्यामात्रप्रमाणंविहायमानांतरेणचात्वालनिर्मा

शम्यामात्रः स्तुसर्वत्रव्यक्तंबौधायनोब्रवीत्॥१२॥ अन्यथाग्नेविरोधस्यान्माने
चान्यंन्नविद्यते॥ उत्तरेंसेमहावेद्यामात्त्वालः परिकीर्तितः॥ १३॥

णे दोषमाह॥ अन्यथेति॥ उक्तप्रमाणंविहायमानांतरेणचात्वालनिर्माणेक्रियमाणेउत्तरवेद्यग्नेर्दोषारोपप्रसं
गात्। अस्तुनामदोषारोपः अंगीकृत्याप्याह॥ मानेचान्यंन्नविद्यतइति॥ सेस्वकीयसूत्रंविहायसूत्रांतरेष्वपिचात्वा
लसंबंधिमानांतरस्याविद्यमानत्वात्॥ ॥प्रथमपवमार्थश्चात्वालस्थानप्रदर्शनमाह॥ उत्तरेंसेति॥ थमित्याशं
क्यवरुपरीयखननमेवतेषांप्रयोजकंनद्वारास्वरूपवैलक्षण्यं एतस्यतुत्रिवितस्तप्रमाणखनने न अस्यशरीष ६

© Dharmartha Trust J&K. Digitized by eGangotri

खननमेवप्रयोजकंतद्द्वारास्वरूपवैलक्षण्यंइतिमनसिनिधायउपसंहारवाक्येशम्ययैवचतुरंगीमानंकरणीय
मितिश्रुतत्वात्ननस्वरूपवैलक्षण्यंकिंतुप्रकृतप्रमाणापुरुषबाहुल्यरूपंवैलक्षण्यंतुवर्त्तनएवतत्तुप्रकृतावन
पयुक्तत्वादस्मादनादरणीयंएवंचसतिप्राकृतचात्वालापेक्षयावड्ढपुरुषखननद्वारास्वरूपवैलक्षण्यमितिवक्त
व्यं॰वहिष्पवमानगानार्थंआधारभूतःस्थलविशेषआस्तावशब्दवाच्यः॥ ॥उपराणांस्थाननियममाह॥दक्षिणे

दक्षिणेतुहविर्धानेपश्चात्त्रीन्प्रक्रमान्त्यजेत्॥
पादोनद्वितयेपार्श्वेरत्नौतूपरवास्मृताः॥ १४॥

तुहविर्धानइति॥हविर्धानमंडपेदक्षिणापार्श्वेत्रीन्प्रक्रमशब्दोपलक्षितान्त्रीन्अरत्नीन्त्यजेत्।पार्श्वेदक्षिणो
त्तरपार्श्वेपादेनन्यूनौद्वौअवयवौयस्यततोपादोनद्वितयो।संख्यायाअवयवेतयवितितयपप्रत्ययः।अरत्नीत्य
जेत्।तन्मध्येअरत्निपरिमितस्थलेउपरवाःकर्त्तव्याः॥ ॥ननुउपरवाःकर्त्तव्याइत्युक्तेउपरवशब्दार्थस्यासं

© Dharmartha Trust J&K. Digitized by eGangotri

संस्तवस्यात्परिचये इति हलायुधः। स्तवत्वात्तत्स्वरूपनिर्माणप्रकारमाह॥ अर्धप्रादेशत इति॥ षडंगुलप्रमित
मारज्वेति तातव्यं। अरत्निमात्रस्य चतुरस्रक्षेत्रस्य कोणचतुष्के स्थिताः ये शंकवः तेषु षडंगुलेन भ्रमणं कर्तव्य
मित्यर्थः॥ ॥इदानीं सर्वसौमिकपात्राणां ग्रहचमसादीनां असदनार्थं उपरवेभ्यः अग्रेतनप्रदेशे खरनिर्मा

अर्धप्रादेशतः स्तेषां भ्रमणं कोणशंकुषु। अग्रेणोपरवान् त्यक्त्वा पादेन
प्रक्रमत्रयं॥१५॥ शम्यामात्रश्चतुस्त्रिः खरः शिष्टस्तु संचरः॥

णप्रकारमाह॥ ॥अग्रेणेति॥ उपरवान् अग्रेण उपरवेभ्यः अग्रेणेति। एनप्प्रत्ययसंयोगेन अनंतरका
रकविभक्तेः अवर्णयुक्तं। वस्तुतस्तु तत्संयोगाभावे अपादानविभक्तेः अवर्णस्यैव स्यात्॥ ब्रह्मणः गमनाग
मनव्यवहारार्थं स्थापितव्यं। अत एव + पादेन प्रक्रमत्रयं त्यक्त्वा शम्यामात्रः चतुस्त्रिः खरः कर्तव्य इति
शेषः। अवशिष्टः प्रदेशः अभिषवकाले + पात्राणां संचारः शिष्टस्य तदा पस्तंबमुनेः अनुशासनमपि सद्द

© Dharmartha Trust J&K. Digitized by eGangotri

तुकत्वेनोपपद्यते॥ ॥औदुंबरीस्थूणायाः स्थाननियममाह॥ ॥औदुंबरीति॥ सदोमंडपमध्ये पृष्ठ्यादक्षिणात
एकप्रक्रमे अतीते सति औदुंबरीस्थानं प्रतिबोध्यं यामवष्टभ्य उद्गाता गायति सा औदुंबरी औदुंबरीं स्पृष्ट्वोद्गायेदिति
दितिसामशाखीय श्रुतेः उक्तार्थमुपसंहरति॥ इतीति॥ अरत्निप्रमाणेन दंडेन सौमिकी वेदिः इति पूर्वोक्तप्रका
रेणाईरिता। अरत्निप्रमाणेन ईरिता इत्यनेन वाक्येन अस्याः वेदेः मानांतरमप्यस्तीति ध्वन्यते॥ ॥इति देवया

औदुंबरीसदोमध्ये पृष्ठ्यादक्षिणातः क्रमे॥१६॥
इत्यरत्निप्रमाणेन सौमिकी वेदिरीरिता॥ ॥

ज्ञिकछात्रेण शारदानंदयज्वना विरचितं सोमविहारप्रतिपादकानां मंडनकारिकाणां विवरणं समाप्तं॥ ॥
अथ प्रक्रमानप्रतिपादकानां मंडनकारिकाणां विवरणं कर्तुं प्रतिजानीते॥ प्रक्रमशब्देन त्रिं९ शत्यंगुलात्म
को दंडः। सः द्विपदप्रक्रमः। पदं द्वि शांगुलमिति न्यायात्॥ द्विगुणीभूतो दशांगुलः द्विपदप्रक्रमः। सोत्र प्रक्र

© Dharmartha Trust J&K. Digitized by eGangotri

मशब्दवाच्यप्राग्वंशमानन्तु एवंस्वत्रानुरीत्या अनेनैव दंडेनातेनैव महावेदिविमानं प्रदर्शयति ॥ मीयते सौमिकी वेदिरिति ॥ सार्वधातुके यगिति कर्मार्थे यक्प्रत्ययो बोद्धव्यः ॥ द्विदशांगुलैः प्रक्रमैरिति ॥ विंशत्यंगुलैरित्यर्था र्थस्यैव कथनं ॥ पंचदशशंकूनां आरोपणामपि एवंवत्पादक्रमानुसारेणैव ज्ञातव्यमित्याह ॥ आदौ त्रि

मीयते सौमिकी वेदिः प्रक्रमैर्द्विदशांगुलैः ॥ आदौ त्रिषु नव द्व्येकचंद्र द्विशरस्मद्विषु ॥ १ ॥
एकैकद्विशरैकेषु शंकवो दशपंच च ॥ ड्रिंशिकामानरज्जुः तस्यां घट्टेषु लक्षणं ॥ २ ॥

स्विति ॥ चंद्रशब्देन एकप्रक्रमः ॥ शरशब्देन पंचप्रक्रमाः ॥ अन्यत्सर्वं स्पष्टं ॥ वेदिमानार्थं रज्जुमानमाह ॥ षड्रिंशिकामानरज्जुरिति पुनरुपन्यासः ॥ तस्यां घ ॥ ॥ मानरज्जुः षड्रिंशिके वन एवं वृत्तकिंचिद्दूना अष्टात्रिंशद्रात्निका ॥ एतद्दापनार्थमेव षड्रिंशिकामानरज्जुरिति पुनरुपन्यासः ॥ तस्यां षड्रिंशिकायां मानदंडेन षोडशप्रक्रमेषु परिगणितेन तेषु स्तंसु आकर्षणार्थं चिह्नं कर्तव्यमित्याह ॥ घट्टेषु लक्षणमिति ॥ एवं

© Dharmartha Trust J&K. Digitized by eGangotri

वद्द्वादशिकापि निर्मातव्येत्याह। विमानेइति॥ अरत्निमानवत्र सर्वं बोध्यं॥ ॥वेद्यादीनां निर्माणमपि पूर्वव
ज्ज्ञातव्यमित्याह॥ श्रोणीइति॥ सदोमंडपस्यापि मानं पूर्ववदेव ज्ञातव्यं। तत्र किंचिद्विशेषमाह॥ सदोनंतरंतु
र्ययोरिति॥ द्वितीयचतुर्थशंक्वोरितियावत्। अनेनवाक्येन प्रक्रममानेपि सदसः अरत्निरूपेण अरत्निना
नवारत्निविस्तृतत्वं पूर्वापरभागेन यत्तज्ज्ञापितं तत्प्रामादिकमेवेत्यग्रेस्फुटीकरिष्यति। किंतुप्रक्रमरूपेण

विमाने पाशयोर्मध्ये प्रक्रमा द्वादश स्मृताः॥ श्रोणी पंचदश स्याद्वै स
दोनंतरतुर्ययोः॥३॥ तत्कोणः पंचमोनेषु भास्करेषु दशस्वपि॥

अरत्निना नवारत्नित्वं भाव्यं। एवं कृते वेद्यादीनां वैषम्याभावादनुपपत्तेः॥ ॥दक्षिणोत्तरभागेपि विमानाव
धिमाह। तत्कोण इति॥ पंचमोनेषु प्राकृतप्रक्रमपंचमांशे॥४॥ न्यूनेषु दशसु प्रक्रमेषु भास्करेषु द्वाद
शसु प्रक्रमेष्वतीतेषु सत्सु सदसः दक्षिणमर्यादा बोध्या। एवं प्राकृतप्रक्रमपंचमांशेन न्यूनेषु दशसु प्रक्र

© Dharmartha Trust J&K. Digitized by eGangotri

मेघतीतेषु सत्सु सदसः उत्तरमर्यादा बोध्या। एवं सदसि मीते सति अनुपयुक्तेन अरत्निरूपेण। अरत्निना
२ सदसः दक्षिणोत्तरपार्श्वे अष्टादशारत्नित्वं कथितं उपयुक्तेन प्रक्रमेण तु वस्त्वंगुलहीनद्वाविंशतिप्रक्रम
त्वं दक्षिणोत्तरपार्श्वे कथितं। उपयुक्तानुपयुक्तयोर्मध्ये उपयुक्तस्य प्रबलत्वादित्यनेन न्यायेन उपयुक्त
१

प्रक्रमेणैव सदसः नवारत्नित्वं युक्तं न तु अनुपयुक्तेन अरत्निरूपप्रक्रमेण नवारत्नित्वं युक्तं। यद्यपि प्रकृति
न्यायेन दक्षिणोत्तरपार्श्वेपि अष्टादशप्रक्रमत्वस्यैवाभ्यर्हितत्वं युक्तं। तथाप्यस्मिन् विषये नानाशास्त्रस्य विद्य
मानत्वादष्टादशारत्नित्वमपि प्रक्रममानेन यथेष्टमुपपद्यते। यत्तु पूर्वस्मिन् वाक्ये दक्षिणोत्तरपार्श्वेपि अ २
ष्टादशप्रक्रमैः स्येवाभ्यर्हितत्वमित्युक्तं तत्र श्रुतिप्रमाणं दर्शयति तथाहि। यथा रथाद्योनियतां गप्रमा

© Dharmartha Trust J&K. Digitized by eGangotri

णाः एकस्मिंन्नंगेपि मात्रया हीयमाने सम्यङ् न गच्छति। एवं अस्य क्रतोः आयतनादीन्यपि मात्रया हीनानि सा
धनाभावं न गच्छंती। सा हि श्रुतीनामुपन्यासात् सदोहविर्धानादीनां आयतनानि स्वेन स्वरूपेण समानान्येव अ
पेक्षितानि। प्रक्रमप्राधान्ये विहारे तु सदोहविर्धानयोः अरत्निदंडेन न वा रत्निस्वीकारपक्षे श्रुतिबाधमसंगा
त्। वेद्यादीनां आयतनानां मानभ्रेषप्रसक्तेश्च। आयतनभ्रेषप्रसक्तिमेवोपपादयति॥ महावेदिमाने प्रक्र
मस्य प्राधान्यत्वं सदोहविर्धान्योर्माने अरत्निदंडस्य प्राधान्यत्वं। आग्नीध्रप्राग्वंशयोर्माने प्रक्रमस्य प्राधा
प्र न्यत्वं। इदमेवायतनभ्रेषाणां स्वरूपं। आयतनभ्रेषे जाते सति प्रायश्चित्तेन भवितव्यं। यस्मिन् विहारे य
स्य प्राधान्यं तेनैव सर्वं संपादयेदिति न्यायात्। यथा औपदेशिको विहारः। एवं प्रक्रमविहारे प्रक्रमरूपेणात्र

© Dharmartha Trust J&K. Digitized by eGangotri

रत्निनासदोहविर्धानयोः नवारत्नित्वं संपादनीयं न तु अरत्निरूपेण अरत्निना। एकप्रक्रमविहारेप्येवमेव बोध्यं

१० यत्तु कराबंदभाष्यकारेण अतिनिर्बन्धवचनेन तस्य श्रुतिबाधकत्वादुपेक्ष्यमिति दिगलं विस्तरेण।। ।।इदा

नीं धिष्ण्यमानमाह।। तृतीये इति।। घंतराः द्वाभ्यां प्रक्रमाभ्यां अंतराः घंतराः मध्यशंकोः दक्षिणपार्श्वे प्रक्र

10

तृतीये घंतरा धिष्ण्याः तेषां प्रादेशतोन्तरमः।।४।।

मद्वये व्यतीते सति प्रशस्तधिष्ण्यार्थं शंकुं निहन्यात्। उत्तरपार्श्वेप्येवमेव प्रक्रमद्वये व्यतीते सतिश्च स्वपत्रा

दीनां धिष्णियार्थं शंकुचतुष्टयस्यारोपणं कर्तव्यं।। शंकूनां आरोपणानंतरं भ्रमणक्रियत्वमाणम् तयार

ज्वाकर्तव्यमित्याशंक्याह।। प्रादेशतोन्त्रम इति।। द्वादशांगुलप्रमाणम् तयारज्वेनि फलितार्थकथनेन नतु भ्र १०

मणं तु प्रतिज्ञातं अंतराचेत्तु धिष्णियानां न प्रतिज्ञातं तत्केन प्रकारेण ज्ञातं ज्ञातव्यं इति चेत्परिशेष्या

© Dharmartha Trust J&K. Digitized by eGangotri

तषोडशांगुलस्वरूपेणेति ज्ञातव्यं किंचपमानमाह ॥ रुद्रेष्विति ॥ पादोनितेषु रुद्रेषु एकादशप्रक्रमेषु उत्तर
पार्श्वे व्यतीतेषु सत्सु तस्मिन्नेव प्रदेशे पादोनितेषु सप्तदशसु प्रक्रमेष्वतीतेषु सत्सु तत्र आग्नीध्रमंडपस्य प
श्चिमावधिभूतौ शंकू निखातव्यौ ॥ ॥ आग्नीधिष्णियामानमाह ॥ पंचमेत्विति ॥ पंचमे शंकौ रज्जुद्वयं निधाय द
क्षिणोत्तरपार्श्वे द्वादशसु प्रक्रमेष्वतीतेषु सत्सु दक्षिणपार्श्वे मार्जालीयधिष्ण्यार्थं शंकुनिखननं कर्तव्यं उत्तर

रुद्रेषु सप्तदशसु शंकू पादोनितेष्विह ॥ आग्नीध्रं च पंचमे तु धिष्ण्यौ द्वादश
सु स्मृतौ ॥ ५ ॥ षष्ठे स्यात्संचकेधानं पंचांशद्वितयान्विते ॥ ॥

पार्श्वे आग्नीध्रधिष्ण्यार्थं शंकुनिखननं कर्तव्यं ॥ ॥ हविर्धानमानमाह ॥ षष्ठेति ॥ षष्ठे शंकौ रज्जुद्वयं निधाय
अष्टांगुलाधिकपंचप्रक्रमे उभयपार्श्वे व्यतीते सति हविर्धानस्य पश्चिमावधित्वं ज्ञेयं ॥ पंचांशद्वितयान्विते त्ये
तद्वाक्यं हविर्धानस्य अरत्निरूपेण अरत्निनानवारत्निलक्ष्यापनार्थं ॥ अष्टांगुलाधिकपंचप्रक्रमस्य साधैन

© Dharmartha Trust J&K. Digitized by eGangotri

त्तरत्नित्वं परिगणनया वोध्यं। ननु प्रक्रममाने हविर्धानस्य नवारत्नित्वे किमस्तं। कारविंद भाष्यकाराणां श्रुति
११ निर्बंधवचनमेवमस्तं। वस्तुतस्तु दक्षिणोत्तरपार्श्वं पूर्वपश्चिमपार्श्वं च षोडशप्रक्रमनवप्रक्रमास्यैवाभ्यां हेत
त्वं यत्वं दशप्रक्रममानस्यस्य नवप्रक्रमस्य चाभ्यर्हितत्वं युक्तं। प्रक्रमप्राधान्येन अष्टादशप्रक्रमनवप्रक्रमे

सप्तमे प्राग्वदाग्नीध्रं॥ नवमे मनुष्यक्तारः॥ ६॥

त्वयोः स्वीकारपक्षे श्रुतिबाधायाः अप्रसक्तेर्भाष्यकारमते तु हविर्धानविषये श्रुतिबाधकत्वमस्त्येव॥ ॥
आग्नीध्रमंडपस्य पूर्वावधित्वमाह॥ सप्तमे प्राग्वदाग्नीध्रमिति॥ सप्तमे प्राग्वदाग्नीध्रमिति॥ शंकौ एकस्यां नि
धाय द्वादशिकां च निधाय पाशेनैकादशसु प्रक्रमेषु तीतेषु सप्तसु पाशेन सप्तदशसु प्रक्रमेषु तीतेषु सप्तसु आ ११
ग्नीध्रमंडपस्य पूर्वावधिमतो शंकुर्निखातव्यो॥ ॥ उक्तरमानमाह॥ नवमे इति॥ नवमे शंकौ एकस्यां द्वादशि

© Dharmartha Trust J&K. Digitized by eGangotri

कांचनिधायचतुर्दशसुप्रक्रमेषु उत्तरपार्श्वे व्यतीतेषु सत्सु उक्तारस्थानज्ञानार्थं शंकुरोपणं कर्तव्यमित्यर्थः॥ ॥हविर्धानमंडपस्य पर्वावधिमानमाह॥ ॥एकादशेहविर्धानमिति॥ एकादशे शंकौ रज्जुद्वयं निधाय अष्टांगुलाधिकपंचप्रक्रमे उभयपार्श्वे व्यतीते सति हविर्धानमंडपस्य पर्वावधिलं ज्ञेयं॥ ॥ पाशव्यत्ययमपि पर्ववत् अस्मिन्नेव शंकौ कर्तव्यं॥ ॥प्रसङ्गप्राप्तार्थस्याग्नेः स्थापनार्थं स्थाननियममाह॥ षोडशस्विति॥ द्वादशे शंकौ रज्जुद्वयं

एकादशे हविर्धानं पाशो व्यत्यस्य पर्ववत्॥ षोडशस्वर्धहीनेषु शामित्रो द्वादशे भवेत्॥७॥

शंक्वोरुत्तरवेदिः स्यात्सार्धद्वय उपांत्ययोः॥

निधाय सार्धपंचदशसु प्रक्रमेषु उत्तरपार्श्वे व्यतीतेषु सत्सु शामित्राग्नेः स्थापनार्थं स्थलं ज्ञातव्यमित्यर्थः॥ ॥ उत्तरवेदिमानमाह॥ शंक्वोरिति॥ अंत्यस्य शंकोः समीपे स्तः पांडतौ यौ तयोः उपांत्ययोः त्रयोदशचतुर्दशरूपयोः शंक्वोः उत्तरवेदिः स्यात्। उत्तरवेदिशब्दः आहवनीयवाचकः। कस्मिन् सति सार्धद्वये प्रक्रमे उभय

© Dharmartha Trust J&K. Digitized by eGangotri

पार्श्वे व्यतीते सति। अनेन वाक्येन उत्तरवेदेः शरप्रक्रमत्वं प्रतिबोधितं॥ ॥महावेदेः अंसमानमाह॥ अंति
१२ मेति। एतावद्दस्थानद्योतके शंकौ उभयपार्श्वे द्वादशसु प्रक्रमेषु अतीतेषु सत्सु अंसद्योतकौ शंकू निखातव्यौ॥
चात्वालमानमाह॥ चात्वालं सादुदक्क्रम इति॥ उत्तरस्मादंसादुदक्प्रदेशे एकप्रक्रमे व्यतीते सति चात्वाल

अंतिमे द्वादशस्वंसौ चात्वालं सादुदक्क्रमे॥ शम्यामात्रस्तु चात्वालो बोधायन
मताद्वेत्र॥ अन्यथाग्नौ विरोधः स्यान्मानं चान्यं न विद्यते॥ २॥

शंकुं निहन्यात्॥ ॥चात्वालस्वरूपमाह॥ शम्यामात्र इति॥ षड्विंशदंगुलात्मकेन दंडेन चतुर्दिक्षु चतुरस्रक्षे
त्र स्वरूपं चात्वालः। ननु एवं स्मादि द्वारादश चात्वालविषये मानांतरमप्यस्तु इत्याशंक्याह॥ बौधायनमतादि
ति॥ बौधायनग्रहणं सर्वसूत्रोपलक्षणार्थं। ननु बौधायनमतं विहाय मतांतरस्वीकारे को दोषः तत्राह॥ अन्य
थाग्नौ विरोधः स्यादिति॥ अग्निलौकिकत्वं विना दोषांतरं नानुमी तइत्यर्थः॥ अत एव बौधायनमतादि १२

© Dharmartha Trust J&K. Digitized by eGangotri

त्मकत्वं। ननु अस्तु नाम अग्निलौकिकत्वं मानांतरं स्वीकुर्मः इति चेत्तत्राह॥ मानांतरं चान्यं न विद्यत इति॥ ह्रस्वायणा
प्रभृतिसूत्रेष्वप्यदर्शनादिति॥ ॥कारविंदभाष्यकारमते सदोहविर्धानयोर्विषये किंचिद्विशेषमाह॥ ॥पुरः प
श्चादिति॥ उभयोः नवारत्नि तत्स्थापनार्थं वचनं॥ ॥उपरवाणांमानमाह॥ दक्षिणेतु हविर्धाने इति॥ हविर्धा
नमंडपस्य दक्षिणपार्श्वे त्रीन्प्रक्रमान्पश्चात्त्यजेत्। दक्षिणोत्तरपार्श्वे अंगुलिद्वयसंयुतौ प्रक्रमौ त्यजेत्। तन्म

परः पश्चात्तत्सदोधानात्सजेत्प्रक्रमपंचकं॥ दक्षिणेतु हविर्धाने पश्चात्त्रीन्प्रक्रमांस्त्यजेत्॥१०॥
पार्श्वद्वये प्रक्रमौ च अंगुलिद्वयसंयुतौ॥ अरत्निमात्रं मध्ये स्यादुपराणां तु लक्षणं॥११॥

ध्ये मार्गं यदरत्निपरिमितं सूत्रं तत्र केणशंकुपशरागुलेन भ्रमणं कर्तव्यं। तदुपराणां उपरवाणां लक्षणं स्वरू
पं॥ ॥इति प्रक्रममानेन सोमविहारप्रतिपादकानां मंडनकारिकाणां विवरणं समाप्तं॥ ॥श्रीः॥ अथ एक
प्रक्रममानप्रतिपादकानां मंडनकारिकाणां विवरणं कर्तुं प्रतिजानीते॥ अस्मिन्विहारे ष्टप्रक्रमस्यैव प्राधा

© Dharmartha Trust J&K. Digitized by eGangotri

न्यत्वं।आरत्निप्रक्रमयोर्न।स्वकीयनामधेयेनविहारनिर्देशेकृतेसतितस्योत्कृष्टत्वख्यापनात्।प्रक्रममाने
१३ प्येवमेनवोध्यं।तत्रपदमानेनमहावेदिंचिकीर्षेन्नतत्स्वभावित्वेनप्राग्वंशमंडपमानंपर्ववदेवकर्तव्यं।त
13 त्रषोडशप्रक्रमस्थानेषोडशपदानिज्ञेयानि।पूर्वापरपार्श्वयोर्दक्षिणोत्तरपार्श्वेद्वादशपदानिज्ञेयानि।रज्जु

त्रिणवेकद्वित्रिपंचस्वेकैकद्वित्रिपंचसु॥
तेभ्यश्चप्रक्रमेपाशः एष्पादावपिचेष्यते॥१॥

करणांतुसर्वत्रयावदायामंडप्रमाणमित्यादिनाअवगंतव्यं।एतावद्वाक्येनप्राग्वंशनिर्माणंप्रतिपादितं॥॥
इदानींमहावेदिनिर्माणार्थंशंकूनांआरोपणप्रकारमाह॥त्रिनवैकरत्नि॥ननुकिंनिरूपितत्वंत्रित्वंमित्या
शंक्यअर्थात्प्रथमशंकुनिरूपितत्वमितिवोध्यंम।नवैकादीनामपिपर्वनिहितशंकुसादृश्यापेक्षयेनि १३
ज्ञातव्य।एवंस्मिन्विहारद्वयेपंचदशशंकवः विहारनिर्माणंप्रतिनिमित्तत्वेनोपन्यस्ताः।अत्रतुत्रयोद

© Dharmartha Trust J&K. Digitized by eGangotri

श शंकवः निमित्तत्वेनोपन्यस्यन्तो तभ्यः त्रिनवादिरूपेण निहितेभ्यः प्रक्रमेभ्यश्च एकः शंकुः इष्टः। आ
वश्यकतया आरोपणीयः। एष्टाद्यौ वेदिमानरज्ज्वोः आद्यौ आदिप्रदेशे अपि च शब्दाभ्यां अन्त्येपि पाशः इ
ष्यते॥ एवं व देव उभयपार्श्वे पाशौ कार्यौ॥ ॥पाशनिर्माणस्य प्रयोजनमाह॥ एष्टायामिति॥ विहारभ्र
मौ समत्वज्ञानार्थं प्रसृता रज्जुः सा एष्टा तस्याः एष्टायां शंकुभिः कृतचिन्हेषु सत्सु पाशयोरपि शंकवः

एष्टायां कृतचिह्नेषु पाशयोरपि शंकवः॥ विमाने पाशयोर्मध्ये प्रक्रमा
द्वादश स्मृताः॥ २॥ घष्टासु प्रथमे शंकौ श्रोण्यौ पंचदशस्वपि॥

तत्तन्मानानुसारेण भविष्यंतीति फलितार्थकथनमिदं॥ ॥पदमानप्रधानाद्द्वादशिकापि एवं व देव कर्तव्ये
त्याह॥ विमाने इति॥ प्रक्रमशब्दो लाक्षणिकः। उत्तममध्यमाधमरूपेण सर्वमानेषु सद्भावात्॥ ॥इदानी
महावेदिमानमाह॥ घष्टाभिरिति॥ प्रथमे शंकौ रज्जुद्वयं निधाय घष्टासु प्रक्रमेषु उभयपार्श्वे व्यतीतेषु स

© Dharmartha Trust J&K. Digitized by eGangotri

त्सु पंचदशसु प्रक्रमेषु श्रोणियोः शंकू श्रोणिघातकौ शंकू निखातव्यौ॥ ॥सदोमानमाह॥ द्वितीये चेति॥ द्विती
१४ येशंकौ रज्जुद्वयं निधाय दशाष्टासु पदेषु उक्तन्यायेन उभयपार्श्वव्यतीतेषु सप्तसु शंकुद्वयं निखातव्यं। सदसः पु
रोभागघातके तृतीये च शंकौ दशाष्टासु पदेषु अतीतेसु सप्तसु शंकुद्वयं निखातव्यं। तेन निखननेन सदोमंडपः
14

द्वितीये च दशाष्टासु तृतीये च पुरः सदः॥३॥ पादोनैकादशात्तद्वदक्षस्तद्व
त्सप्तदशस्वथ॥ पंचमे पंचस्वर्केषु स्यातामाग्नीध्रलीयकौ॥४॥

सिद्धः॥ ॥तृतीयशंकावेव आग्नीध्रमंडपनिर्माणमाह॥ पादोनैकादशेति॥ पादोनैकादशसु पदेषु पादो
नसप्तदशसु पदेषु उत्तरपार्श्वव्यतीतेषु सप्तसु सप्तद्वये शंकुनिखननं कर्तव्यं। तच्छंकुद्वयं आग्नीध्रमंडपस्य
पश्चिमावधिर्मतं॥ ॥हविर्धानमंडपस्य आग्नीध्रीयमार्जालीयधिष्ण्योश्च मानमाह॥ पंचम इति॥ पंचमे १४
शंकौ रज्जुद्वयं निधाय दक्षिणतः उत्तरतश्चाकृष्य पंचसु पदेषु अतीतेषु सप्तसु हविर्धानमंडपस्य पश्चिमा

© Dharmartha Trust J&K. Digitized by eGangotri

वधितज्ज्ञापनार्थं शंकुद्वयं निखातव्यं। द्वादशसुपदेषु उभयत्र अतीतेषु सत्सु आग्नीध्रमार्जालीयार्थं शंकुद्वयं नि
खातव्यं॥ ॥रण्प्रत्ययस्य प्रकृतेः पर्वावधिमामानमाह॥ षष्ठे पादोनवध्रीयमिति॥ षष्ठे शंकौ रज्जुद्वयं निधा
य पादोनैकादशसु पदेषु उत्तरप्रदेशे व्यतीतेषु सत्सु तथा पादोन सप्तदशसु पादेषु तत्रैव व्यतीतेषु सत्सु आ
ग्नीध्रीयमंडपस्य पर्वमर्यादाज्ञानार्थं शंकुद्वयस्यारोपणं कर्तव्यं॥ ॥उत्करमानमाह॥ अष्टमे इति॥ अष्ट

षष्ठे पादोनवध्रीयमष्टमे मनुषत्करः॥
व्यस्तत्स्ययाहविर्धानं नवमे पंचसु स्मृतं॥ ५॥

मे शंकौ मनुषु पदेषु उत्तरप्रदेशे व्यतीतेषु सत्सु उत्करस्थानज्ञापनार्थं शंकुरोपणं कर्तव्यं॥ ॥हविर्धानस्य प
र्वप्रदेशावधिमाह॥ व्यस्तत्स्ययेति॥ नवमे शंकौ व्यस्तत्स्यया व्यत्यासंस्थापितया शट्त्रिंशत्प्रदात्मिकया रज्ज्वा
उभयपार्श्वे पंचसु पदेषु अतीतेषु सत्सु साकल्य स्वरूपं हविर्धानस्वरूपं ज्ञातव्यं॥ ॥उत्तरवेदिमानमाह॥ रु

© Dharmartha Trust J&K. Digitized by eGangotri

द्रकेति॥रुद्रकेएकादशेशंकौद्वादशेचरज्जुद्वयंनिधायदक्षिणोत्तरपार्श्वेसार्धद्विपदेव्यतीतेशंकुचतुष्टयस्या
१५ रोपणंकर्तव्यं।किंच।एवमुत्तरेति॥उत्तरवेदिस्वरूपंएवमेवज्ञातव्यं॥अंसमानमाह॥अंसेत्विति॥सपारोप
णहेतुभूतेरज्जुद्वयंनिधायदक्षिणोत्तरपार्श्वेद्वादशसुपदेषुव्यतीतेषुतत्सुवेदिसंबंध्यंसमानंकुर्यात्।तत्रशं

15

रुद्रकेर्धतृतीयेतुद्वादशेचैवमुक्तगा॥
अंसेतुद्वादशस्वंसौसौमिकीसपरिच्छदा॥ ६

कुंनिखनेदितियावत्॥ ॥ननुमहावेदिनिर्माणानंतरंसदोहविर्धानादीनांउपरिकटादिभिराच्छादनंकर्तव्यं
वानवेत्याशंक्यआवश्यकतयाआच्छादनंकर्तव्यमित्याशयेनाह॥सौमिकीति॥सपरिच्छदा।परिच्छदैःसहिता
सपरिच्छादा।उपरितनप्रदेशेआच्छादनसहिता।दृष्टफलोत्पत्त्यर्थमेवआतपपर्जन्यादीनांनिवर्तनमेवदृष्टफ १५
लोत्पत्तिःअदृष्टफलोत्पत्तिश्च।मध्यमंछदिरध्यूहतीत्यादौतथादर्शनात्॥ ॥पदमानेनमहावेदिकर

© Dharmartha Trust J&K. Digitized by eGangotri

णां धिष्ण्यानां किंचिद्विशेषमाह। वेद्यामिति॥ अष्टादशांगुला इति॥ एकांगुलिसंयुक्तेन नवसु अंगुलेषु धिष्ण्यानां भ्रमणं कर्तव्यं॥ ननु परस्परं अंतरालप्रदेशः कियानित्याशंक्य आह॥ पादोनाष्टांगुलं स्मृतमिति॥ ॥किंचिच्च
पद्मानेन महावेदिनिर्माणप्रसे उत्तरवेद्यां अत्रापि पूर्ववदेव होतुर्धिष्ण्यस्य यं कोः सकाशात् किंचिन्न्यूनषड्विंशसंगुले उत्तरतः शंकुं निहन्यात्‌· एवमेव तदुत्तरतः त्रीन् शंकून् निहन्यात्‌· तत्र नवांगुलेन परिभ्रमणे क्रियमाणे नि

वेद्यांतु पद्मानायां धिष्ण्याः स्युरष्टादशांगुलाः। अंतरालं तु धिष्ण्यानां पादोनाष्टांगुलं स्मृतं॥७
पद्मानाम् महावेदिर्युगमात्री ततोत्तरा। मीलैव मुत्तरां वेदिं स्मिमेदेकादशांगुलं॥ ८॥

णया सेन पादोनाष्टांगुलमंतरालं संभवति· + द्यां किंचिद्विशेषमाह॥ पद्मानायला वेदिरिति॥ ततः तदेस्यर्थः। उत्तरवेदिः युगमात्री बोध्या॥ षडशीत्यंगुलप्रमितं युगमिति शुल्वसूत्रे निर्दिष्टत्वात्। युगमात्रत्वं उत्तरवेदेः कथं संपादनीयमित्याशंक्य तत्र युक्तिनिरूपणमाह॥ मीलैवमिति एवं उत्तरां वेदिमीलाप्रकृतिवत्‌ सार्धे द्वि

© Dharmartha Trust J&K. Digitized by eGangotri

१६ पदेशांकंनिखायेत्यर्थः। एकादशांगुलंअस्यामेवक्षिपेत्। तदयमर्थः। एकादशांगुलंउत्तरवेद्याः पश्चात्क्षिपेत्
तदर्धंतु। दक्षिणोत्तरपार्श्वेपिसार्धशांगुलीनक्षिपेत्। एवंकृतेयुगमात्रत्वंउत्तरवेदिसंत्रस्योपपद्यते॥ ॥
16
पश्चाततः तदर्धंतुदक्षिणोत्तरतः क्षिपेत्। इत्येकपदमानेनसोमिकीवेदिरीरिता
॥ ९॥ इतिमानत्रयपरिमितासोमविहारकारिकासमाप्ताः॥ ॥

उक्तार्थमुपसंहरति॥ इतीति॥ इतिईरिता। इतीतिकथं। त्रिनवादिश्लोकाश्रयणेनितिज्ञातव्यं॥ ॥ इतिपद
मानप्रतिपादकसोमविहारकारिकाविवरणंसमाप्तं॥ ॥ श्रीगुरुचरणकमलाभ्यांनमः॥ ॥ १६

© Dharmartha Trust J&K. Digitized by eGangotri